One Year PG in

Darshanam

अधिगमपरिणाम-आधारितपाठ्यचर्यारूपरेखा

स्नातकोत्तरकार्यक्रमः - दर्शनम्

2025

ज्ञान-विज्ञान विमुक्तये

UGC

विश्वविद्यालय-अनुदान-आयोगः

बहादुरशाह-जफर-मार्गः

नवदेहली – 110002

Curriculum Development Committee for One Year PG (Darshanam)

Prof. Sukant Kumar Senapati
Chairperson of the committee and Vice-Chancellor, Shri Somnath Sanskrit University, Veraval,
✉ sukantsnpt@gmail.com
Dr. Pooja Manmohan Upadhyaya
Assistant Professor and Head, Department of Vishisht Sanskrit, Maharshi Panini Sanskrit evam Vedic Vishwavidyalaya, Dewas Road, Ujjain 456010
✉ dr.pooja80@gmail.com
Dr. G. Narasimhulu
Assistant Professor, Dept. of Indian and Western Philosophy, Central Sanskrit University, Bhopal Campus, Sanskrit Marg, Baghsewaniya, Bhopal, Madhya Pradesh - 462043
✉ dr.gnarasimhulu.@csu.co.in
Dr. Ghanshyam Mishra
Assistant Professor, Dept. of Indian and Western Philosophy, Central Sanskrit University, Bhopal Campus, Sanskrit Marg, Baghsewaniya, Bhopal, Madhya Pradesh - 462043
✉ dr.ghanshyam.mishra@csu.co.in
Dr. Chetan Kumar, Guest Faculty (Asst. Prof. Grade), Dept. of Indian and Western Philosophy, Central Sanskrit University, Jaipur Campus, Jaipur (Raj.) 302018
✉ dr.chetan@csu.co.in
Dr. Pavan Vyas
Co-Ordinator of the committee and Associate Professor, Dept. of Indian and Western Philosophy, Central Sanskrit University, Bhopal Campus, Sanskrit Marg, Baghsewaniya, Bhopal, Madhya Pradesh - 462043
✉ dr.pavan.vyas@csu.co.in

विषयसूची

कार्यक्रमस्य परिचयः 1

कार्यक्रमस्य उद्देश्यानि 2

कार्यक्रमस्य परिणामाः 3

प्रधानानां पाठ्यक्रमाणां कार्यक्रमपरिणामैः सह योजनम् 4

चितस्वशास्त्रविषयकपाठ्यक्रमाणां कार्यक्रमपरिणामैः सह योजनम् 5

प्रधानपाठ्यक्रमाणां सञ्चयः 6

चितस्वशास्त्रविषयकपाठ्यक्रमाणां सञ्चयः 6

प्रधानपाठ्यक्रमाः 7

प्रथमसत्रार्द्धः (Semester - 1) 8

प्रधानः पाठ्यक्रमः (Major) 1.1: न्यायवैशेषिकदर्शनम् 8

प्रधानः पाठ्यक्रमः (Major) 1.2: साङ्ख्यदर्शनम् 10

प्रधानः पाठ्यक्रमः (Major) 1.3: योगदर्शनम् 13

प्रधानः पाठ्यक्रमः (Major) 1.4: चार्वाकदर्शनम् 15

द्वितीयसत्रार्द्धः (Semester - 2) 18

प्रधानः पाठ्यक्रमः (Major) 2.1: बौद्धदर्शनम् 18

प्रधानः पाठ्यक्रमः (Major) 2.2: मीमांसादर्शनम् 21

प्रधानः पाठ्यक्रमः (Major) 2.3: औपनिषददर्शनम् 24

प्रधानः पाठ्यक्रमः (Major) 2.4: अद्वैतवेदान्तदर्शनम् 26

चितस्वशास्त्रविषयक-पाठ्यक्रमाः 29

प्रथमसत्रार्द्धः (Semester - 1) 30

चितस्वशास्त्रविषयः (DSE) 1.क.1: शैवदर्शनानि 30

चितस्वशास्त्रविषयः (DSE) 1.क.2: वैष्णवदर्शनानि 33

चितस्वशास्त्रविषयः (DSE) 1.क.3: शाब्दबोधविमर्शः 36

चितस्वशास्त्रविषयः (DSE) 1.क.4: आधुनिकभारतीयदर्शनानि 39

द्वितीयसत्रार्द्धः (Semester - 2) 42

चितस्वशास्त्रविषयः (DSE) 2.क.1: तुलनात्मकदर्शनम् 42
चितस्वशास्त्रविषयः (DSE) 2.क.2: पाश्चात्यदर्शनम् 44
चितस्वशास्त्रविषयः (DSE) 2.क.3: जैनदर्शनम् 46

कार्यक्रमस्य परिचयः

(Introduction of the Program)

आचार्यः दर्शनम् (M.A. in Darshan) इत्याख्यः पाठ्यक्रमः एकवर्षात्मकः कार्यक्रमः वर्तते। कार्यक्रमेऽस्मिन् आहत्य द्वे सत्रे भवतः। अस्य कार्यक्रमस्य उद्देश्यं तावत् नवीनदृष्टिकोणयुक्तानां छात्राणां भारतीयदर्शनस्य स्नातकोत्तरपाठ्यक्रमेषु उन्मुखीकरणम् अस्ति। अयं पाठ्यक्रमः "अधिगमपरिणामाधारितपाठ्यक्रमचर्यारूपरेखा (LOCF)" इत्यस्य आधारेण निरूपितोऽस्ति, यः विविधविश्वविद्यालयेषु अनुसर्तुं योग्यः विद्यते। LOCF पद्धतिः स्नातकोत्तरस्तरे लक्ष्यकेन्द्रितस्य पाठ्यक्रमस्य प्रस्तुतये उपकरोति। इयं पद्धतिः छात्रकेन्द्रितायाः शिक्षणाधिगमप्रक्रियायाः आविष्करणे अत्युपयुक्ता भवतीत्यभिप्रायेण निरूपिता अस्ति। एषा पद्धतिः अधिगमानुभवे स्पष्टतां दार्ढ्यं च समुत्पादयति। अनया पद्धत्या छात्राः यथेच्छं स्वीयपाठ्यक्रमे संलग्नाः भवन्ति। ईदृशः स्नातकोत्तरपाठ्यक्रमः न केवलं दर्शनविषये शिक्षणं प्रददाति अपितु व्यक्तित्वविकसनेन सह उपजीविकां कल्पयति। LOCF पद्धतिः पाठ्यक्रमस्य स्वरूपं विस्तरेण वर्णयति। अपि च पाठ्यक्रमस्य अध्ययनाद् ये ये परिणामाः प्राप्यन्ते, तानपि सूचयति। अयं कार्यक्रमः छात्रेषु निरन्तराध्ययनयोग्यतां, स्थिरजीवनं च कल्पयति। पुनः भारतीयदर्शनाध्ययनविषये दृष्टिकोणं च परिवर्तयति।

आचार्यः दर्शनम् (M.A. in Darshan) इत्येषः पाठ्यक्रमः प्राच्यप्रतीच्यदर्शनानां परम्परां प्रमाणं प्रमेयं पुरुषार्थचिन्तनं च प्रबोधयितुं सङ्कल्पितो विद्यते। एषः पाठ्यक्रमः विविधदर्शनान्याश्रित्य समीक्षात्मकरूपेण, विमर्शणात्मकरूपेण, विशिष्टचिन्तनेन च निर्मितोऽस्ति। अयं पाठ्यक्रमः अन्तःशास्त्रीयपद्धतिम् अनुसरति यया छात्राः भारतीयदर्शनस्य विस्तृतं परिचयं प्राप्नुवन्ति। ये च छात्राः अन्यान्विषयान् शोधसम्बद्धान् अपि पठन्ति, तेषु विषयेषु अपि विशिष्टं ज्ञानं प्राप्नुवन्ति। अयं पाठ्यक्रमः न केवलं अध्यात्मविज्ञानेन सह सम्बन्धं स्थापयति, अपितु जीवनकौशलैः सह अपि सम्बन्धं स्थापयति। अनेन पाठ्यक्रमेण छात्राः भारतीयदर्शनानां विश्लेषणे समस्या-समाधानयोरधिगमने च सामर्थ्यं सम्पादयन्ति। एषः पाठ्यक्रमः छात्रेषु बौद्धिकसामर्थ्यं जनयितुं रचितोऽस्ति, येन छात्रः व्यक्तित्वविकासं जीवनविकासं च आसादयितुं समर्थः भवेत्। अयं पाठ्यक्रमः भारतीयदर्शनाध्ययनस्य सामान्यरूपेण प्रचलितान् दृष्टिकोणान् आविष्कर्तुम् अन्यथाधारणां च अपाकर्तुं तद्द्वारा भारतीयदर्शनाध्ययने छात्राणां रुचिं च जनयितुं संरचितः वर्तते।

अर्हता - शास्त्रीकक्ष्यायां तत्समकक्ष्यापरीक्षायां N.T.A. द्वारा सञ्चाल्यमानार्हतापरीक्षायां वा उत्तीर्णाः छात्राः कार्यक्रमेऽस्मिन् प्रवेष्टुमर्हन्ति। अत्र सत्रद्वये आहत्य -

- प्रधानपाठ्यक्रमाः (Major Course) 08 पाठ्यक्रमाः (Courses/Papers)
- चितस्वशास्त्रविषयकपाठ्यक्रमाः (DSE) 06 पाठ्यक्रमाः (Courses/Papers)

कार्यक्रमस्य उद्देश्यानि

(Program Objectives)

अस्य पाठ्यक्रमस्य उद्देश्यम् एवम्प्रकारेण निर्दिष्टं भवति –

1. सर्वेषां दर्शनानां परम्परायाः प्रमाणानां प्रमेयाणां पुरुषार्थानां च परिचयप्रदानं प्रवचनकौशलसामर्थ्यविकासश्च।।
2. प्राच्य-प्रतीच्य-आधुनिकदर्शनानां प्रमुखसिद्धान्तानां तुलनात्मकदृष्ट्या अवबोधनम्।
3. वर्तमानसन्दर्भे प्राच्य-प्रतीच्य-आधुनिकदर्शनानां प्रासाङ्गिकता-प्रतिपादनम्।
4. दर्शनशास्त्रेषु प्रतिपादितानां सिद्धान्तानां शास्त्रान्तरेषु प्रयोगबोधः।
5. प्राचीनकालादारभ्य अद्यावधिपर्यन्तं महत्याः दार्शनिकपरम्परायाः सम्यगवबोधः।
6. दर्शनशास्त्रेषु अनुसन्धानदृष्टिविकासः।
7. दर्शशास्त्राध्यनेन नैतिकमूल्यानां परिपोषणम्।
8. तर्कशास्त्राध्ययनेन वाक्यार्थकौशलाभिवर्धनम्।
9. वाक्यार्थपद्धत्याः शिक्षणेन शास्त्रसंरक्षणम् अभिवर्धनं च।
10. दर्शनशास्त्रैः सह शास्त्रान्तरेषु शाब्दबोधप्रक्रियायाः अवबोधनम्।

कार्यक्रमस्य परिणामाः

(Program Outcomes)

दर्शनशास्त्राध्ययनं सर्वशास्त्रोपकारकमिति लक्ष्यं मनसि निधाय संरचितपाठ्यक्रममधीत्य विद्यार्थिन: सर्वाङ्गीणविकासमार्गे उन्मुखा: भूत्वा कार्यक्रमसमाप्तेः परं अधोदत्तदक्षताः प्रदर्शयितुं शक्ताः भविष्यन्ति।

- विद्यार्थिषु तर्ककौशलविकासेन सर्वविषयेषु अप्रतिहतगति: भविष्यति।
- भारतीयेन सह वैश्विकदार्शनिकपरम्पराबोधेन तुलनात्मकदृष्टिविकासो भविष्यति।
- विविधदर्शनानां ज्ञानमीमांसातत्त्वमीमांसयो: गूढार्थबोध: छात्राणां जीवनदृष्टिं परिमार्क्ष्यन्ति।
- विविधदर्शनानामाचारमीमांसाऽवबोधेन विद्यार्थिषु नैतिकमूल्यानि विवेकशक्तिश्च सहजतया वर्धिष्यते।
- दर्शनशास्त्रस्य जीवनेन सह अपरिहार्यसम्बन्धबोध: भविष्यति।
- दर्शनशास्त्रे अनुसन्धानसम्भावनाया: परिचयात् दार्शनिकशोधेषु नवाचारा: भविष्यन्ति।
- दर्शनशास्त्रस्य शास्त्रान्तरेण सह अन्तर्विषयकानुसन्धानानि कर्त्तुं छात्रा: प्रेरिता: भविष्यन्ति।
- दर्शनशास्त्रस्य विषयं बुद्ध्वा प्राचीनशास्त्रार्थपद्धत्या अभिव्यक्तौ समर्था: भविष्यन्ति।
- आधुनिककाले दर्शनशास्त्रस्य प्रासङ्गिकताबोधो भविष्यति।
- दर्शनशास्त्रस्याध्ययनेन उत्तमव्यक्तित्ववन्त: भूत्वा छात्रा: कल्याणप्रदसमाजनिर्माणे प्रवृत्ता: भविष्यन्ति।

प्रधानानां पाठ्यक्रमाणां कार्यक्रमपरिणामैः सह योजनम्

(PROGRAM OUTCOME MAPPING FOR MAJOR COURSES)

Course Name पाठ्यक्रमनाम	Rootedness भारतीय मूलानि	IKS भारतीय ज्ञान परम्परा	Futuristic भविष्य वादी	Employability वृत्तिप्रदान क्षमता	Value, Skill and Multidisciplinary मूल्यानि, कौशलानि एवं बहुशास्त्रीयपाठ्यक्रमः	Disciplinary Knowledge अध्ययन शाखायाः ज्ञानम्	Difficulty Level काठिन्यस्तरः
न्यायवैशेषिकदर्शनम्	✓	✓	✓	✓	✓	✓	✓
साङ्ख्यदर्शनम्	✓	✓	✓	✓	✓	✓	✓
योगदर्शनम्	✓	✓	✓	✓	✓	✓	✓
चार्वाकदर्शनम्	✓	✓	✓	✓	✓	✓	✓
बौद्धदर्शनम्	✓	✓	✓	✓	✓	✓	✓
मीमांसादर्शनम्	✓	✓	✓	✓	✓	✓	✓
औपनिषददर्शनम्	✓	✓	✓	✓	✓	✓	✓
अद्वैतवेदान्तदर्शनम्	✓	✓	✓	✓	✓	✓	✓

चितस्वशास्त्रविषयकपाठ्यक्रमाणां कार्यक्रमपरिणामैः सह योजनम्

(PROGRAM OUTCOME MAPPING FOR DSE COURSES)

Course Name पाठ्यक्रमनाम	Rootedness भारतीयमूलानि	IKS भारतीय ज्ञान परम्परा	Futuristic भविष्यवादी	Employability वृत्तिप्रदान क्षमता	Value, Skill and Multidisciplinary मूल्यानि, कौशलानि एवं बहुशास्त्रीय पाठ्यक्रमः	Disciplinary Knowledge अध्ययनशाखायाः ज्ञानम्	Difficulty Level कठिनतायाः स्तरः
शैवदर्शनानि	✓	✓	✓	✓	✓	✓	✓
वैष्णवदर्शनानि	✓	✓	✓	✓	✓	✓	✓
शाब्दबोधविमर्श	✓	✓	✓	✓	✓	✓	✓
आधुनिकभारतीयदर्शनानि	✓	✓	✓	✓	✓	✓	✓
तुलनात्मकदर्शनम्	✓	✓	✓	✓	✓	✓	✓
पाश्चात्यदर्शनम्	✓	✓	✓	✓	✓	✓	✓
जैनदर्शनम्	✓	✓	✓	✓	✓	✓	✓

प्रधानपाठ्यक्रमाणां सञ्चयः

क्र.सं.		पाठ्यक्रमाः	पाठ्यक्रम-श्रेयोऽङ्कः	पाठ्यक्रम-काठिन्यस्तरः
1	प्रथमसत्रार्द्धस्य प्रधानपाठ्यक्रमाः	प्रधानः 1.1: न्यायवैशेषिकदर्शनम्	4	600-699
2		प्रधानः 1.2: साङ्ख्यदर्शनम्	4	600-699
3		प्रधानः 1.3: योगदर्शनम्	4	600-699
4		प्रधानः 1.4: चार्वाकदर्शनम्	4	600-699
5	द्वितीयसत्रार्द्धस्य प्रधानपाठ्यक्रमाः	प्रधानः 2.1: बौद्धदर्शनम्	4	600-699
6		प्रधानः 2.2: मीमांसादर्शनम्	4	600-699
7		प्रधानः 2.3: औपनिषददर्शनम्	4	600-699
8		प्रधानः 2.4: अद्वैतवेदान्तदर्शनम्	4	600-699

चितस्वशास्त्रविषयकपाठ्यक्रमाणां सञ्चयः

क्र.सं.		पाठ्यक्रमाः	पाठ्यक्रम-श्रेयोऽङ्कः	पाठ्यक्रम-काठिन्यस्तरः
1	प्रथमसत्रार्द्धस्य चितस्वशास्त्रविषयक -पाठ्यकमाः	चितस्वशास्त्रविषयः 1.क.1: शैवदर्शनानि	4	600-699
2		चितस्वशास्त्रविषयः 1.क.2: वैष्णवदर्शनानि	4	600-699
3		चितस्वशास्त्रविषयः 1.क.3: शाब्दबोधविमर्श	4	600-699
4		चितस्वशास्त्रविषयः 1.क.4: आधुनिकभारतीयदर्शनानि	4	600-699
5	द्वितीयसत्रार्द्धस्य चितस्वशास्त्रविषयक -पाठ्यकमाः	चितस्वशास्त्रविषयः 2.क.1: तुलनात्मकदर्शनम्	4	600-699
6		चितस्वशास्त्रविषयः 2.क.2: पाश्चात्यदर्शनम्	4	600-699
7		चितस्वशास्त्रविषयः 2.क.3: जैनदर्शनम्	4	600-699

प्रधानपाठ्यक्रमाः

काठिन्यस्तरः 600-699	श्रेयोऽङ्काः - 4 होराः - 60

प्रथमसत्रार्द्धः (Semester - 1)

प्रधानः पाठ्यक्रमः (Major) 1.1: न्यायवैशेषिकदर्शनम्

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. न्यायवैशेषिकदर्शनयोः आचार्यपरम्परायाः परिज्ञानम्।
2. न्यायवैशेषिकदर्शनयोः ज्ञानमीमांसायाः अवबोधनम्।
3. न्यायदर्शनस्य तत्त्वमीमांसायाः विमर्शः।
4. न्यायदर्शने ईश्वरस्वरूपस्य परिज्ञानम्।
5. पदार्थानां साधर्म्यवैधर्म्यप्रतिपादनम्।
6. वैशेषिकदर्शने पाकजोत्पत्तिप्रक्रियायाः विवेचनम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. न्यायवैशेषिकदर्शनयोः आचार्यपरम्परां ग्रन्थपरम्परां च परिज्ञातुं शक्ष्यन्ति।
2. न्यायवैशेषिकदर्शनयोः प्रमाणानां ज्ञानं प्राप्स्यन्ति।
3. न्यायदर्शनस्य षोडशपदार्थान् विज्ञाय तेषां विवेचनं कर्तुं प्रभविष्यन्ति।
4. पदार्थानां साधर्म्यं वैधर्म्यं बोधयितुं शक्ष्यन्ति।
5. वैशेषिकदर्शनस्य सप्तपदार्थानां विश्लेषणं कर्तुं शक्ष्यन्ति।
6. न्यायवैशेषिकदर्शनस्य सृष्टिसंहारप्रक्रियां वक्तुं शक्ष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 1.1	न्यायवैशेषिकदर्शनम्	4	0	0	4

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. न्यायवैशेषिकदर्शनस्य आचार्यपरम्परा। **श्रेयोऽङ्कः १**

- न्यायदर्शनस्य आचार्यपरम्परा - अक्षपादगौतमः, वात्स्यायनः, वाचस्पतिमिश्रः।
- गङ्गेशोपाध्यायः, वर्धमानः, पक्षधरमिश्रः, केशवमिश्रः, शङ्करमिश्रः, वासुदेवसार्वभौमः, रघुनाथशिरोमणिः।
- जयन्तभट्टः, भासर्वज्ञः, उदयनाचार्यः, शिवादित्यः, श्रीवत्सः, मथुरानाथतर्कवागीशः।
- जगदीशतर्कालङ्कारः, शङ्करमिश्रः, गदाधरभट्टाचार्यः, विश्वनाथपञ्चाननभट्टाचार्यः।
- वैशेषिकदर्शनस्य आचार्यपरम्परा - कणादः, प्रशस्तपादाचार्यः, श्रीधराचार्यः, व्योमशिवाचार्यः, उद्योतकरः, अन्नंभट्टः।

अन्वितिः २. न्यायवैशेषिकदर्शनस्य ज्ञानमीमांसा। **श्रेयोऽङ्कः १**

- प्रमाणसामान्यलक्षणम्।
- प्रमाणानि - प्रत्यक्षप्रमाणम्, अनुमानप्रमाणम्, उपमानप्रमाणम्, शब्दप्रमाणम्।
- चतुर्षु प्रमाणेषु अर्थापत्त्यादीनां प्रमाणानामन्तर्भावः।
- प्रामाण्यवादः।

अन्वितिः ३. न्यायदर्शनस्य तत्त्वमीमांसा। **श्रेयोऽङ्कः १**

- षोडशपदार्थाः - प्रमाणम्, प्रमेयम्, संशयः, प्रयोजनम्, दृष्टान्तः, सिद्धान्तः, अवयवः, तर्कः, निर्णयः, वादः, जल्पः, वितण्डा, हेत्वाभासः, छलः, जातिः, निग्रहस्थानम्।
- आत्मा।
- ईश्वरः।
- मोक्षः।
- कार्यकारणवादः (कारणलक्षणं, कारणभेदाः, असत्कार्यवादः)

अन्वितिः ४. वैशेषिकदर्शनस्य तत्त्वमीमांसा। **श्रेयोऽङ्कः १**

- द्रव्यम्।
- गुणः।
- कर्म।
- सामान्यम्।
- विशेषः।
- समवायः।
- अभावः।
- पदार्थानां साधर्म्यं वैधर्म्यम्।
- सृष्टिप्रक्रिया, पीलुपाकः, पिठरपाकः।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. प. श्रीकृष्णवल्लभाचार्यः, न्यायसिद्धान्तमुक्तावली, (1971), वाराणसी : चौखम्बा संस्कृत सीरीज आफिस।
2. शुक्लः, बदरीनाथः, तर्कभाषा, दिल्ली : मोतीलाल बनारसीदास।

सहायकाः ग्रन्थाः (Additional Readings)

1. उपाध्याय, आचार्य बलदेव, भारतीय दर्शन, (2001), वाराणसी : शारदा मन्दिर।

काठिन्यस्तरः 600-699	श्रेयोऽङ्काः - 4 होराः - 60

प्रधानः पाठ्यक्रमः (Major) 1.2: साङ्ख्यदर्शनम्

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. साङ्ख्यदर्शनस्य उद्भवविकासयोः परिचायनम्।
2. साङ्ख्यदर्शनस्य आचार्यपरम्परावबोधः।
3. साङ्ख्यदर्शनस्य तत्त्वमीमांसायाः ज्ञानमीमांसायाश्च विश्लेषणम्।
4. दुःखत्रयस्वरूपबोधः हानोपायबोधनं च।
5. सृष्टिप्रक्रियापरिज्ञानं, सत्कार्यवादबोधनं च।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. साङ्ख्यशब्दस्य व्युत्पत्तिम्, ऐतिहासिकपृष्ठभूमिञ्च वर्णयितुं शक्ष्यन्ति।
2. चतुर्विंशतितत्त्वानां स्वरूपं, परस्परसम्बन्धञ्च निरूपयितुं समर्थाः भविष्यन्ति।
3. प्रमाणत्रयस्य स्वरूपं, तद्भेदान्, प्रामाण्यं च यथावत् व्याख्यातुं शक्ष्यन्ति।
4. सत्कार्यवादं, दुःखत्रयस्वरूपं, बन्धस्वरूपं कैवल्यञ्च विश्लेषयितुं समर्थाः भविष्यन्ति।
5. साङ्ख्यदर्शनस्य वैज्ञानिकतार्किकतत्त्वचिन्तनात्मकपद्धतिं विविच्य आधुनिकदर्शनेषु तस्य प्रासङ्गिकताम् अन्वेष्टुं शक्ष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 1.2	साङ्ख्यदर्शनम्	4	0	0	4

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. साङ्ख्यदर्शनस्य उद्भवो विकासश्च। **श्रेयोऽङ्कः १**

- साङ्ख्यशब्दनिष्पत्तिः।
- श्रुतिस्मृतिपुराणेषु साङ्ख्यदर्शनसन्दर्भाः।
- साङ्ख्यदर्शनस्य आचार्यपरम्परा : कपिलमुनिः, आसुरिः, पञ्चशिखाचार्यः, विज्ञानभिक्षुः, ईश्वरकृष्णः, वाचस्पतिमिश्रः, गौडपादाचार्यः, माठराचार्यप्रभृतयः।

अन्वितिः २. साङ्ख्यदर्शनस्य तत्त्वमीमांसा। **श्रेयोऽङ्कः १**

- पुरुषतत्त्वम्।
- प्रकृतिस्वरूपम्।
- महत्तत्त्वम्।
- अहङ्कारतत्त्वम्।

- इन्द्रियाणि (ज्ञानेन्द्रियाणि कर्मेन्द्रियाणि च)।
- मनः।
- तन्मात्राः।
- महाभूतानि।

अन्वितिः ३. साङ्ख्यदर्शनस्य ज्ञानमीमांसा। श्रेयोऽङ्कः १

- दृष्टप्रमाणम्।
- अनुमानप्रमाणं तद्भेदाश्च।
    - वीतम् (पूर्ववत्, सामान्यतोदृष्टम्)
    - अवीतम् (शेषवत्)
- शब्दप्रमाणम्।

अन्वितिः ४. साङ्ख्यदर्शनस्य प्रमुखसिद्धान्ताः। श्रेयोऽङ्कः १

- दु:खत्रयस्वरूम्।
- सत्कार्यवाद:।
- बन्धविमर्श:।
- कैवल्यविमर्श: तत्साधनञ्च।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. वाचस्पतिमिश्र:, (2004), साङ्ख्यतत्त्वकौमुदी, पं. ज्वालाप्रसादगौडकृतहिन्दीव्याख्यासहिता, वाराणसी : चौखम्बासुरभारतीप्रकाशनम्।

सहायकाः ग्रन्थाः (Additional Readings)

1. ईश्वरकृष्ण:, (1999), *साङ्ख्यकारिका, तत्त्वप्रभाटीका, हिन्दी-अनुवादसहिता* (डॉ. रमाशंकरत्रिपाठी) तृतीयसंस्करणम्, कृष्णदास-अकादमी।
2. ईश्वरकृष्ण:, (2001), *साङ्ख्यकारिका, गौडपादभाष्यसहिता तथा पं. ज्वालाप्रसादगौडकृतहिन्दी-व्याख्यासहिता* (पुनर्मुद्रितसंस्करणम्), चौखम्बाविद्याभवनम्।
3. ईश्वरकृष्ण:, (2001), *साङ्ख्यकारिका, वाचस्पतिमिश्रकृतसाङ्ख्यतत्त्वकौमुद्या तथा सारबोधिनीव्याख्यया सहिता,* पं. शिवनारायणशास्त्रिव्याख्यासहिता, पुनर्मुद्रितसंस्करणम्, चौखम्बाविद्याभवनम्।
4. विज्ञानभिक्षु:, (2000), *साङ्ख्यदर्शनम्, विज्ञानभिक्षुकृतसाङ्ख्यप्रवचनभाष्येन,* डॉ. *मुसलगांवकरकृतप्रदीप-व्याख्यया सहितम्* (द्वितीयसंस्करणम्), चौखम्बासंस्कृतसंस्थानम्।
5. विज्ञानभिक्षु:, (1998), *साङ्ख्यप्रवचनभाष्यम्,* डॉ. धर्मानन्दशर्मा, (हिन्दी-अनुवादक), अमरग्रन्थपब्लिकेशन्स।
6. *युक्तिदीपिका* (1996), आचार्यकेदारनाथकृतहिन्दीव्याख्यासहिता, प्रथमसंस्करणम्, सम्पूर्णानन्दसंस्कृतविश्वविद्यालय:।

7. शास्त्री, आचार्य उदयवीर, (2012), सांख्यदर्शन का इतिहास, दिल्ली : विजयकुमार गोविन्दराम हासानन्द, 4408 नई सड़क – 110006
8. शास्त्री, आचार्य उदयवीर, (2012), सांख्यसन्दर्भ, विजयकुमार गोविन्दराम हासानन्द, 4408 नई सड़क - 110006

काठिन्यस्तरः 600-699

श्रेयोऽङ्काः - 4
होराः - 60

प्रधानः पाठ्यक्रमः (Major) 1.3: योगदर्शनम्

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. योगलक्षणावबोधः।
2. चित्तवृत्तीनां स्वरूपावगमः तदुपायावगतिश्च।
3. समाधिस्वरूपावगमनम्।
4. अन्तरायादीनां विवेचनसामर्थ्यसम्पादनम्।
5. क्रियायोगस्य स्वरूपज्ञानम्।
6. यमनियमादियोगसाधनानां स्वरूपज्ञानसम्पादनम्।
7. योगाभ्यासवशात् प्राप्तसिद्धीनां ज्ञानावाप्तिः।
8. दृश्यद्रष्टृस्वरूपावगतिः।
9. कैवल्यस्वरूपविचारसामर्थ्यसम्पादनम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. योगलक्षणविचारे अधिकारिणः भविष्यन्ति।
2. चित्तवृत्तीनां स्वरूपज्ञानेन सह तदुपायोपस्थापने समर्थाः भविष्यन्ति।
3. समाधिस्वरूपप्रतिपादनं कर्तुं शक्ष्यन्ति।
4. अन्तरायादीनाम् उपस्थापने समर्थाः भविष्यन्ति।
5. क्रियायोगस्य स्वरूपावबोधने समर्थाः भविष्यन्ति।
6. यमनियमादियोगसाधनानां प्रतिपादने सक्षमाः भविष्यन्ति।
7. योगाभ्यासवशात् प्राप्तसिद्धीनां विवरणं कर्तुं शक्ष्यन्ति।
8. दृश्यद्रष्टृस्वरूपप्रतिपादने अधिकारिणः भविष्यन्ति।
9. कैवल्यविचारं कर्तुं समर्थाः भविष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 1.3	योगदर्शनम्	4	0	0	4

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १.योगस्वरूपम्। **श्रेयोऽङ्कः १**

- योगदर्शनस्य आचार्यपरम्परा।
- योगस्य लक्षणं तत्फलं च।
- चित्तवृत्तयः योगोपायाश्च।
- समाधिस्वरूपम्।

- अन्तरायाः पञ्चक्लेशाश्च।

अन्वितिः २. योगसाधनानि। **श्रेयोऽङ्कः १**

- क्रियायोगः।
- कर्मफलविचारः।
- हानस्वरूपं तदुपायश्च।
- यमनियमादीनि अष्टौ अङ्गानि।

अन्वितिः ३. योगविभूतयः। **श्रेयोऽङ्कः १**

- चित्तस्य त्रिविधपरिणामः।
- संयमस्य अन्तरङ्गता।
- संयमस्य सिद्धयः।
- भूतजयस्य इन्द्रियजयस्य च सिद्धयः।

अन्वितिः ४. पुरुषार्थचिन्तनम् – कैवल्यम्। **श्रेयोऽङ्कः १**

- दृश्यद्रष्टृस्वरूपम्।
- विवेकज्ञाननिरूपणं कैवल्यनिर्वचनं च।
- धर्मिस्वरूपम्।
- जीवन्मुक्तस्य मनोवृत्तिः कैवल्यस्वरूपव्यवस्था च।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. महर्षिपतञ्जलिः, (2020), पातञ्जलयोगदर्शनम् (व्यासभाष्यसहितम्), डॉ.सुरेशचन्द्रश्रीवास्तव (व्याख्याकारः), वाराणसी : चौखम्बा सुरभारती प्रकाशन

सहायकाः ग्रन्थाः (Additional Readings)

1. महर्षिपतञ्जलिः, पातञ्जलयोगदर्शनम् (भोजवृत्तिसहितम्), वाराणसी : चौखम्बा सुरभारती प्रकाशन
2. वाचस्पतिमिश्रः, योगदर्शनभाष्यटीका-तत्त्ववैशारदी, वाराणसी : चौखम्बा सुरभारती प्रकाशन।
3. सेनापतिः, सुकान्तकुमारः, दर्शनार्णवः, (2024), नई दिल्ली : केन्द्रीयसंस्कृतविश्वविद्यालयः।

काठिन्यस्तरः 600-699	श्रेयोऽङ्काः - 4 होराः - 60

प्रधानः पाठ्यक्रमः (Major) 1.4: चार्वाकदर्शनम्

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. चार्वाकदर्शनस्य मूलतत्त्वानां प्रसिद्धसिद्धान्तानाञ्च सम्यक्बोधनम्।
2. प्रमाण-प्रमेय-मोक्षस्वरूपाणां परिज्ञानम्।
3. वैदिकदर्शनैः सह तुलनात्मकदृष्ट्या चार्वाकदर्शनस्य सिद्धान्तानामवबोधनम्।
4. चार्वाकदर्शनस्य व्यापकत्वपरिचायनम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. दर्शनशब्दस्य व्युत्पत्तिं, दर्शनानां भेदं च व्याख्यातुं समर्थाः भविष्यन्ति।
2. चार्वाकजैनदर्शनस्य सामान्यवर्णनं कर्तुं समर्थाः भविष्यन्ति।
3. चार्वाकदर्शनानुसारं जगतः स्वरूपं वर्णयितुं शक्ष्यन्ति।
4. चार्वाकदर्शनानुसारं प्रमाणप्रमेयस्वरूपं सम्यक् व्याख्यातुं शक्ताः भविष्यन्ति।
5. वैदिकदर्शनेन सह चार्वाकदर्शनस्य तुलनात्मकविवेचनं कर्तुं समर्थाः भविष्यन्ति।
6. चार्वाकजैनदर्शनस्य मुख्यसिद्धान्तानां विवेचनं कर्तुं समर्थाः भविष्यन्ति।

श्रेयोङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 1.4	चार्वाकदर्शनम्	3	1	0	4

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. चार्वाकदर्शनस्य सामान्यपरिचयः। **श्रेयोऽङ्कः १**

- दर्शनभेदविचारः।
- चार्वाकदर्शनस्येतिहासः।
- चार्वाकशब्दविचारः।
- लोकायतिकशब्दविचारः।
- चार्वाकदर्शनस्य व्यापकत्वं महत्वञ्च

अन्वितिः २. चार्वाकदर्शनस्य सिद्धान्ताः। **श्रेयोऽङ्कः १**

- पुत्रात्मवादः।

- देहात्मवाद :।
- इन्द्रियात्मवाद:।
- प्राणात्मवाद:।
- मनआत्मवाद:।
- सुखवाद:।
- स्वभाववाद:।

अन्वितिः ३. चार्वाकदर्शने ज्ञानमीमांसा तत्त्वनिरूपणञ्च। **श्रेयोऽङ्कः १**

- ज्ञानमीमांसा प्रत्यक्षप्रमाणविवेचनञ्च।
- अनुमानप्रमाणखण्डनम्।
- तत्त्वमीमांसा।
- चैतन्यविचार:।

अन्वितिः ४. चार्वाकमते आचारमीमांसा मोक्षविचारश्च। **श्रेयोऽङ्कः १**

- ईश्वरः।
- आत्मा।
- मोक्षः।
- आचारमार्गः।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. माधवाचार्यः (विद्यारण्यः), (2010), सर्वदर्शनसंग्रहः, वाराणसी : चौखम्बा।
2. नागसम्पिगे, ए. वि., अडिगः, शङ्करनारायणः, (2012), षड्दर्शनसारः, बेङ्गलूरुः पूर्णप्रज्ञसंशोधनमन्दिरम्।
3. मिश्रः, प्रो. गोपबन्धु,(2020),शास्त्रपरिचायिका, वेरावलम् : श्रीसोमनाथसंस्कृतविश्वविद्यालयः।
4. झा, आचार्य आनन्द, (2013), चार्वाक दर्शन, लखनऊ : उत्तर प्रदेश हिन्दी संस्थान।
5. Chattopadhyaya, Debiprasad, (1959), Lokayat A study in Ancient Indian Materialism, New Delhi : People's Publishing House.

सहायकाः ग्रन्थाः (Additional Readings)

1. त्रिपाठी, शिवदत्तः, भारतीयदर्शनों का इतिहास, वाराणसी : चौखम्बा विद्या भवन।
2. उपाध्याय, बलदेवः, भारतीयदर्शन – साङ्ख्य और योग, प्रयागराज : हिंदी साहित्य सम्मेलन।
3. दासगुप्त, सुरेन्द्रनाथः, भारतीयदर्शन (भाग–1), अनुवादकः - राधाकृष्ण शर्मा, दिल्ली : भारतीयज्ञानपीठ दिल्ली।

4. उपाध्याय , बलदेव, (2002), भारतीय दर्शन, वाराणसी : चौखम्बा संस्कृत सीरीज ऑफिस।
5. गुप्त, जे. एल. चैतन्य', सम्पादक, (2004), षड्दर्शनसूत्रसङ्गहः, नई दिल्ली : चौखम्बा संस्कृत प्रतिष्ठान|
6. गैरोला , वाचस्पति, (1962), भारतीय दर्शन, इलाहाबाद : लोकभारती प्रकाशन।

काठिन्यस्तरः 600-699	श्रेयोऽङ्काः - 4 होराः - 60

द्वितीयसत्रार्द्धः (Semester - 2)

प्रधानः पाठ्यक्रमः (Major) 2.1: बौद्धदर्शनम्

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. बौद्धदर्शनस्य तत्त्वमीमांसायाः सम्यगवबोधनम्।
2. बौद्धदर्शनानुसारं प्रमाण-प्रमेय-निर्वाणस्वरूपाणां परिज्ञानम्।
3. बौद्धदर्शनस्य अन्यदर्शनेन सह तुलनात्मकदृष्ट्या अवबोधनम्।
4. बौद्धदर्शनस्य प्रसिद्धसिद्धान्तानां सम्यक्बोधनम्।
5. बौद्धदर्शनस्य आचारमीमांसायाः स्वरूपज्ञानम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. बौद्धदर्शनस्य सिद्धान्तान् व्याख्यातुं समर्थाः भविष्यन्ति।
2. बौद्धदर्शनस्य वैशिष्ट्यं ज्ञातुं समर्थाः भविष्यन्ति।
3. बौद्धदर्शनानुसारं जगतः स्वरूपं वर्णयितुं शक्ष्यन्ति ।
4. बौद्धदर्शनानुसारं प्रमाणप्रमेयस्वरूपं सम्यक् व्याख्यातुं शक्ताः भविष्यन्ति।
5. वैदिकदर्शनेन सह बौद्धदर्शनस्य तुलनात्मकविवेचनं कर्तुं समर्थाः भविष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 2.1	बौद्धदर्शनम्	4	0	0	4

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. बौद्धदर्शनस्य सामान्यपरिचयः। **श्रेयोऽङ्कः १**

- बौद्धदर्शनस्येतिहासः, गौतमबुद्धस्य जीवनकालः।
- बौद्धदर्शनस्याचार्यपरम्परा -
  - सङ्घभद्रः
  - नागार्जुनः
  - आर्यदेवः
  - भव्यः
  - असङ्गः
  - वसुबन्धुः
  - दिङ्नागः
  - धर्मकीर्त्तिः
  - स्थिरमतिः
  - धर्मपालः

- शान्तरक्षितः
- त्रिपिटकसाहित्यपरिचय:
- सुत्तपिटकम्
- विनयपिटकम्
- अभिधम्मपिटकम्

अन्वितिः २. बौद्धदर्शनस्य ज्ञानमीमांसा तत्त्वमीमांसा च। **श्रेयोऽङ्कः १**

- बौद्धदर्शने ज्ञानस्वरूपम्, प्रत्यक्षप्रमाणम्, अनुमानप्रमाणम्।
- बौद्धदर्शने तत्त्वनिरूपणम्।

अन्वितिः ३. बौद्धदर्शनस्य आचारमीमांसा। **श्रेयोऽङ्कः १**

- आर्यसत्यानि –
  - दु:खम्
  - दु:खसमुदय:
  - दु:ख:निरोध:
  - दु:खनिरोधगामिनीप्रतिपत्
- प्रतीत्यसमुत्पादवाद: (द्वादशनिदानानि)
- रत्नत्रयम् –
  - शीलः
  - समाधिः
  - प्रज्ञा
- निर्वाणविचार:

अन्वितिः ४. बौद्धदर्शनस्य प्रधानसिद्धान्ताः। **श्रेयोऽङ्कः १**

- नैरात्म्यवादः।
- सन्तानवादः।
- बौद्धमते सम्प्रदायाः तेषां सिद्धान्ताश्च –
  - महायानम्
  - हीनयानम्
  - वैभाषिकाः
  - सौत्रान्तिकाः
  - योगाचाराः
  - माध्यमिकाः
- बाह्यार्थप्रत्यक्षवादः, बाह्यार्थानुमेयवादः, विज्ञानवादः, शून्यवादश्च।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. माधवाचार्यः, (2010), सर्वदर्शनसंग्रहः, वाराणसी : चौखम्बा।

सहायकाः ग्रन्थाः (Additional Readings)

1. उपाध्याय, बलदेव, (1946), बौद्ध दर्शन, वाराणसी : शारदा मन्दिर।
2. धर्मकीर्त्तिः, (1972), न्यायबिन्दु, जयपुर : दर्शन प्रतिष्ठान।
3. उपाध्याय, बलदेवः, (1976), भारतीयदर्शन, वाराणसी : चौखम्बा ओरियण्टालिया।
4. पाण्डेय, रामचन्द्र , अञ्जू, (1990), आचार्य नागार्जुन का निःस्वभावता-दर्शन, दिल्ली : ईस्टर्न बुक लिंकर्स।
5. नागार्जुन, (1999), माध्यमिककारिका, दिल्ली : मोतीलाल बनारसी दास।
6. गुप्त, कनछेदीलाल, (2014), धम्मपदम्, वाराणसी : चौखम्बा विद्या भवन।
7. मिश्रः, प्रो.गोपबन्धु, (2020), शास्त्रपरिचायिका, वेरावलम् : श्रीसोमनाथसंस्कृतविश्वविद्यालयः।
8. वरखेडी, श्रीनिवासः, (2024), शास्त्रपद्धतिः, नवदेहली : केन्द्रीयसंस्कृतविश्वविद्यालयः।
9. दासगुप्त, सुरेन्द्रनाथः, भारतीयदर्शन (भाग–1), अनुवादकः - राधाकृष्ण शर्मा, दिल्ली : भारतीयज्ञानपीठ।

काठिन्यस्तरः 600-699	श्रेयोऽङ्काः - 4 होराः - 60

प्रधानः पाठ्यक्रमः (Major) 2.2: मीमांसादर्शनम्

पाठ्यक्रमस्य उद्देश्यानि (Course objectives)

1. मीमांसाशास्त्रपरिचयः शास्त्रे प्रवेशलाभश्च।
2. मीमांसाशास्त्रविषयाणां प्रतिपादनसामर्थ्यलाभः।
3. मीमांसान्यायानां सञ्चारक्रमावबोधः।
4. मीमांसाशास्त्रसिद्धान्तदृढीकरणे न्यायानाम् उपादेयत्वावगमः।
5. मीमांसाशास्त्रे प्रतिपादितानां शास्त्रान्तरसम्बद्धानां विषयाणां बोधः।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. मीमांसाविषयान् विज्ञाय स्वशास्त्रे सम्बन्धं कल्पयितुं शक्ष्यन्ति।
2. मीमांसान्यायानां समन्वयनं कृत्वा स्वशास्त्रसिद्धान्तं दृढीकर्तुं सामर्थ्यं प्राप्स्यन्ति।
3. शास्त्रान्तरेण सह मीमांसादर्शनस्य सिद्धान्तानां तुलनां कृत्वा विशेषाध्ययनं कर्तुं शक्ष्यन्ति।
4. मीमांसादर्शनस्य समन्वयात्मिकां पद्धतिं विज्ञाय वादप्रतिपादने समर्थाः भविष्यन्ति।
5. मीमांसादर्शनस्य वेदवाक्यार्थपद्धतिम् अधिगम्य वाक्यार्थविश्लेषणं कर्तुं समर्थाः भविष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 2.2	मीमांसादर्शनम्	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. मीमांसादर्शनस्य आचार्यपरम्परा। **श्रेयोऽङ्कः १**

- मीमांसादर्शनस्य उद्भवो विकासश्च।
- मीमांसापदार्थविचारः।
- सूत्रकारः - महर्षिः जैमिनिः, भाष्यकारः- शबरमुनिः।
- मीमांसादर्शने प्रस्थानभेदाः।
- कुमारिलभट्टः।
- प्रभाकरमिश्रः।
- प्रमुखाः भाट्टमीमांसकाः -
    - पार्थसारथिमिश्रः

- उम्बेकाचार्यः
- कमलाकरभट्टः
- खण्डदेवः
- वाचस्पतिमिश्रः
- आपदेवः
- लौगाक्षिभास्करः

- गुरुमतस्य प्रमुखाः आचार्याः -
  - शालिकनाथः
  - नन्दीश्वरः
  - रामानुजाचार्यः
  - अहोबलसूरिः

अन्वितिः २.२ मीमांसादर्शनस्य प्रमाणमीमांसा। **श्रेयोऽङ्कः १**

- मीमांसादर्शने प्रमाणसामान्यलक्षणम्।
- प्रमाणानि- प्रत्यक्षम्, अनुमानम्, उपमानं, शब्दः, अर्थापत्तिः, अनुपलब्धिश्च।
- धर्मबोधकप्रमाणानि - विधिः, अर्थवादः, मन्त्रः, नामधेयं, स्मृतिः, आचारश्च।
- विनियोजकप्रमाणानि - श्रुतिः, लिङ्गं, वाक्यं, प्रकरणं, स्थानं, समाख्या च।
- क्रमबोधकप्रमाणानि - श्रुतिः, अर्थः, पाठः, स्थानं, मुख्यः, प्रवृत्तिः।
- प्रमाणचिन्तने भाट्ट-प्राभाकरयोः मतभेदः।
- स्वतःप्रामाण्यम्।

अन्वितिः ३. मीमांसादर्शनस्य प्रमेयमीमांसा। **श्रेयोऽङ्कः १**

- धर्मः।
- प्रमेयाणि – द्रव्यं, जातिः, गुणः, क्रिया, अभावः च।
- अपूर्वः।
- स्वर्गः।

अन्वितिः ४. मीमांसादर्शनस्य प्रमुखाः सिद्धान्ताः। **श्रेयोऽङ्कः १**

- वेदापौरुषेयत्वम्।
- भावनासिद्धान्तः।
- शब्दनित्यत्वम्।
- स्वतःप्रामाण्यवादः।

- जगन्नित्यतावादः।
- भाट्टानां विपरीतख्यातिः।
- प्राभाकराणाम् अख्यातिः।
- वाक्यार्थविचारपद्धतिः/शाब्दबोधः।
- तात्पर्यनिर्णायकलिङ्गानि।
- अधिकरणपद्धतिः।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. लौगाक्षिभास्करः, अर्थसंग्रहः, वाराणसी : चौखम्बा प्रकाशन।
2. नारायणभट्टः, मानमेयोदयः, वाराणसी : चौखम्बा प्रकाशन।

सहायकाः ग्रन्थाः (Additional Readings)

1. उपाध्याय, (1976), बलदेव, वाराणसी : चौखम्बा ओरियण्टालिया।
2. सेनापतिः, सुकान्तकुमारः, दर्शनार्णवः, (2024), नई दिल्ली : केन्द्रीयसंस्कृतविश्वविद्यालयः।
3. आपदेवः, मीमांसान्यायप्रकाशः, नई दिल्ली : श्रीलालबहादुरशास्त्री राष्ट्रीय संस्कृत विद्यापीठ।
4. मुसलगाँवकर, गजाननशास्त्री, वाराणसी : चौखम्बा प्रकाशन।
5. श्रीकृष्ण यज्वा, मीमांसापरिभाषा, वाराणसी : चौखम्बा प्रकाशन।

काठिन्यस्तरः 600-699		श्रेयोऽङ्काः - 4 होराः - 60

प्रधानः पाठ्यक्रमः (Major) 2.3: औपनिषददर्शनम्

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives):

1. उपनिषत्सु विद्यमानानां दर्शनविचारबीजानाम् अभिज्ञानम्।
2. उपनिषद्वाङ्मयस्य स्वरूपप्रवृत्तिप्रयोजनज्ञानम्।
3. उपनिषदां भाष्यपद्धतेः परिज्ञानम्।
4. उपनिषत्सु वर्णितानां सदाचाराणां सम्प्राप्तिः।
5. विविधदर्शनप्रस्थानेषु उपनिषदां प्रभावस्य अन्वेषणम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. उपनिषत्सु विद्यमानानि दर्शनविचारबीजानि अभिज्ञातुं प्रभविष्यति।
2. उपनिषद्वाङ्मयस्य स्वरूपं प्रवृत्तिं प्रयोजनञ्च विज्ञाय तत्र विद्यमानान् विषयान् प्रतिपादयितुं समर्थाः भविष्यन्ति।
3. उपनिषदां भाष्यपद्धतिं विज्ञातुं बोधयितुं च समर्थाः भविष्यन्ति।
4. उपनिषत्सु वर्णितानां सदाचाराणां स्वजीवने सम्प्रयोगं कर्तुं प्रभविष्यन्ति।
5. विविधदर्शनप्रस्थानेषु उपनिषदां प्रभावस्य अन्वेषणं कर्तुं शक्ष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 2.3	औपनिषददर्शनम्	4	0	0	4

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. उपनिषद्वाङ्मयस्य परिचयः। **श्रेयोऽङ्कः १**

- उपनिषच्छब्दस्य व्युत्पत्तिः निर्वचनञ्च।
- उपनिषदां परिचयः।
- उपनिषद्वाङ्मयस्य प्रयोजनम्।
- उपनिषद्वाङ्मयस्य वैशिष्ट्यप्रतिपादनम्।
- उपनिषदां प्रतिपाद्यविषयाः प्रवृत्तयश्च।

अन्वितिः २. उपनिषत्सु वर्णिताः प्रमुखाः दार्शनिकविचाराः। **श्रेयोऽङ्कः १**

- आत्मा।
- ब्रह्म।
- जगत् (सृष्टि-लयप्रक्रिया)
- पञ्चकोशानाम् अवधारणा।
- पुनर्जन्म।
- उपासना।
- कर्मवादः।
- मोक्षः।

अन्वितिः ३. उपनिषदां भाष्यपद्धतिविमर्शः। **श्रेयोऽङ्कः १**

- अधिकरणपद्धतिः।
- उपोद्घातपद्धतिः।
- व्युत्पत्तिविवेचनपद्धतिः।
- शास्त्रार्थपद्धतिः।
- प्रश्नोत्तरपद्धतिः।
- तर्कपद्धतिः।
- निर्वचनपद्धतिः।
- दृष्टान्तपद्धतिः।
- न्यायपद्धतिः।
- लक्षण-परिभाषापद्धतिः।

अन्वितिः ४. औपनिषददर्शनम्। **श्रेयोऽङ्कः १**

- विविधवेदान्तदर्शनसिद्धान्तेषु उपनिषदां प्रभावः।
- साङ्ख्ययोगदर्शनसिद्धान्तेषु उपनिषदां प्रभावः।
- अन्यदर्शनसिद्धान्तेषु उपनिषदां प्रभावः।
- उपनिषत्सु वर्णिता आचारमीमांसा।
- श्रीमद्भगवद्गीतायाः दार्शनिकं महत्त्वम् ।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. आचार्यशङ्करभगवत्पादः, (२००९), ईशादि नौ उपनिषद्, शाङ्करभाष्यार्थ, गोरखपुर : गीताप्रेस।
2. आचार्यशङ्करभगवत्पादः, (२००९), छान्दोग्य उपनिषद्, शाङ्करभाष्यार्थ, गोरखपुर : गीताप्रेस।
3. आचार्यशङ्करभगवत्पादः, (२००९), बृहदारण्यक उपनिषद्, शाङ्करभाष्यार्थ, गोरखपुर : गीताप्रेस।

सहायकाः ग्रन्थाः (Additional Readings)

1. उपाध्याय, बलदेव (प्रधान सम्पादक), (१९९६), संस्कृत-वाङ्मय का बृहद् इतिहास (दशम-खण्ड, वेदान्त), लखनऊ : उत्तर प्रदेश संस्कृत संस्थान ।
2. उपाध्याय, बलदेव, (१९९६), भारतीयदर्शन का इतिहास, शारदा प्रकाशन।
3. शर्मा, राममूर्ति, (२००८), भारतीय दर्शन की चिन्तनधारा, दिल्ली, चौखम्भा ओरियन्टालिया।
4. प्रो. सुरेन्द्र सिंह नेगी, (२००१), भारतीय दर्शन, गाजियाबाद, के. एल. पचौरी प्रकाशन।
5. भद्रेशदासः, (2022), स्वामिनारायणसिद्धान्तसारः, अहमदाबाद : स्वामिनारायण-अक्षरपीठम्।
6. भद्रेशदासः, (2022), स्वामिनारायणसिद्धान्तसुधा, अहमदाबाद : स्वामिनारायण-अक्षरपीठम्।
7. भद्रेशदासः, (2022), स्वामिनारायणभाष्यम्, अहमदाबाद : स्वामिनारायण-अक्षरपीठम्।

काठिन्यस्तरः 600-699	श्रेयोऽङ्काः - 4 होराः - 60

प्रधानः पाठ्यक्रमः (Major) 2.4: अद्वैतवेदान्तदर्शनम्

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. अद्वैतवेदान्तशब्दार्थावबोधनम् ।
2. प्रस्थानत्रयपरिचयावाप्तिः ।
3. प्रमुखाद्वैताचार्याणां परिचयप्राप्तिः ।
4. अनुबन्धचतुष्टयावबोधनम् ।
5. अद्वैतवेदान्तदर्शनप्रतिपादितप्रमाणस्वरूपावगमनम् ।
